Postal Regd.No. GAMC- 1553/2025-2027 ISSN 2454-6313

# संस्कृत-साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकी पत्रिका)
वर्ष : १९ अङ्क : २२५
जान्युआरी - २०२५

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2025-2027 issued by SSP Ahmedabad. Valid upto 31-12-2027. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### जीवनं प्रति उत्साहः

कश्चित् विलक्षणः चिकित्सकः । तस्य नाम मनुः कोठारी । कोठारीवर्यस्य २००६ तमे वर्षे 'अभियान' पत्रिकायां मुद्रितः उत्साहवर्धनः लेखः मया प्राप्तः । सः लिखति यत् आदौ दृढतया स्वीकरणीय् – अस्वास्थ्यं सङ्कटं नास्ति । शरीरं सदैव निरामयम् एव तिष्ठेत् इति भवितुं नार्हति । रोगस्य कारणेन मरणं भवति इत्यपि पूर्णतः सत्यं नास्ति । वस्तुतः मृत्योः कारणं रोगः नास्ति । रोगः शरीरस्य धर्मः अस्ति । मृत्युः कालस्य धर्मः अस्ति ।


केचन चिकित्सकाः आत्मगौरवं पोषयितुं रोगाणां वर्णनं भयानकं रसम् आश्रित्य कुर्वन्ति । हृदयरोगः, विद्रधिः (केन्सर), मधुप्रमेहः इत्यादयः प्रसिद्धाः प्राणहराः रोगाः तत्त्वतः वर्धमाने वयसि जायमानाः प्राकृतिकाः (रोगाः) सन्ति । यथा वयसा सह जायमानं शारीरं परिवर्तनं मनुष्यस्य प्राणान् न हरति, तथैव लोके प्रसिद्धाः प्राणहराः (इति मन्यमानाः) रोगाः अपि मनुष्यं मारयन्ति न । अमेरिकादेशे विद्रधिं प्रति अध्ययनस्य निष्कर्षः आसीत्–विद्रधिः मनुष्यं न हन्ति, समयः एव मनुष्यं हन्ति ।

कोठारीवर्यः रोगं मित्रं मन्यते । किमर्थम् ? रोगाः शरीरस्य क्षमतायाः अभिज्ञां कारयन्ति । मनुष्यः रोगैः शरीरस्य क्षमतां ज्ञातुं परीक्षितुं वा शक्नोति । तस्य कथनेन, यदा कोऽपि असाध्यः व्याधिः जायते तदा मनुष्येण उद्विग्नेन न भाव्यम्, प्रसन्नमुखेन मृत्योः प्रतीक्षा करणीया । मृत्युः प्रभोः वरदानं वर्तते । तेन सह सङ्घर्षः किमर्थम् ?

कोऽपि विद्रधितुल्यः व्याधिः जायते तदा मनुष्यः अपराधभावम् अनुभवति । सः चिन्तयति मया आहारादीनाम् उपेक्षा कृता । अतः एव रोगः प्रविष्टः । परन्तु वस्तुस्थितिः भिन्ना वर्तते । संसारे विद्रधितुल्यैः रोगैः ग्रस्ताः मनुष्याः स्वल्पसंख्यकाः एव खलु । अतः स्वस्थाः मनुष्याः अभिमानेन न वर्तेरन्, न च रोगिणः नैराश्यं गच्छेयुः ।

कोठारीवर्यः अन्ते लिखति यत् असाध्येन रोगेण युक्ताः अपि केचन मनुष्याः चिरं जीवन्ति । आवश्यकः अस्ति जीवनं प्रति उत्साहः । ततः विपरीतम् अपि भवति । बहवः जनाः केनापि रोगेण विना अपि सहसा पञ्चत्वं गच्छन्ति । तात्पर्यम् एतदेव यत् परीक्षणं (रिपोर्ट) भावात्मकं वा अभावात्मकं वा भवेत्, अस्माभिः उत्साहेन जीवनीयम् । सोत्साहानां नराणां किमपि असाध्यं नास्ति ।

# औदार्यं हि सदा श्रेष्ठम्



सुवर्णपुरस्य राजा सुवर्णदेवः धीरः महत्त्वाकांक्षी च। तद्वंशीयानां व्रतशिलाराजवंशीयानां च वैरम् आ बहोः कालात् अनुवर्तते स्म । व्रतशिला सुवर्णपुरस्य प्रतिवेशिराज्यम्। यद्यपि इदानीं व्रतशिलातः भीतिः कापि न आसीत् तथापि राज्ञः विश्वासः न आसीत् यत् अग्रे कदाचित् अपि आक्रमणं न भविष्यति इति । अतः सः स्वसैन्यं सज्जीकृत्य आक्रमणाय उद्युक्तः।

एतत् ज्ञात्वा राज्ञी अवदत् – ''शान्तिस्थितौ सत्यां किम् एतेन आक्रमण–चिन्तनेन ? व्रतशिलायाः राजा अस्वस्थः इति श्रूयते। अस्माकं गुप्तचरविभागः वदति यत् ततः अस्माकं कापि भीतिः नास्ति इति। एवं स्थिते किं वैरचिन्तनेन ? स्नेहप्राप्तये प्रयासः इदानीम् उचितः स्यात् खलु ?'' इति।

मन्त्री राज्ञ्याः वचनं समर्थयन् अवदत् – ''महाराज ! व्रतशिलायाः पूर्वतनः राजा अस्मत्पीडकः आसीत् इति तु सत्यम्। अतः ततः आक्रमणं भवेत् इति निरीक्षा सर्वथा नास्ति। अस्वस्थे अपि तस्मिन् प्रजानां प्रीतिः अधिका। युवराजे तु इतोऽप्यधिका प्रीतिः तासाम्। वयम् आक्रमणं कृत्वा जयं प्राप्नुयाम चेदपि तद्देशीयाः प्रजाः महान्तं विरोधं कुर्युः। तस्मात् शान्तिस्थितिः विनश्येत्'' इति।

''यदा राज्ञः मरणं भविष्यति तदा सिंहासनम् आरोक्ष्यमाणः युवराजः आक्रमणं न कुर्यात् इत्यत्र कः विश्वासः ? यदा अस्माकं शक्तिः भवति तदा एव आक्रमणं चिन्तनीयम्। अन्यथा शत्रोः आक्रमणकाले वयं क्षीणबलाः सन्तः पराजयं प्राप्नुयाम'' इति अवदत् राजा सुवर्णदेवः।

ततः सुर्वणदेवेन आक्रमणं कृतम्। किन्तु व्रतशिलायाः राजा अस्वस्थः सन् अपि सेनायाः नेतृत्वं स्वयं वहन् रणरङ्गं प्रविष्टवान्। एतस्मिन् युद्धे सुवर्णदेवः व्रणितः जातः। तथापि अन्तिमजयः तु तस्यैव आसीत्। व्रतशिलाराजः तेन संहतः। किन्तु अयं जयः तस्मै महान्तं सन्तोषं न प्रादात्। यतः युद्धकाले प्राप्तः व्रणः दिने दिने वर्धमानः तं भृशम् अपीडयत्। वर्षं यावत् पीडाम् अनुभूय सः दिवं गतः।

तस्य एका एव पुत्री आसीत्, न तु पुत्रः कोऽपि। राज्ञी पुत्र्याः निमित्तं योग्यस्य वरस्य अन्वेषणम् आरब्धवती। मन्त्री अन्ये केचन प्रमुखाः च योग्यस्य वरस्य निमित्तं देशे सर्वत्र अटनं कृतवन्तः।

सप्ताहानन्तरं मन्त्री अचिन्तयत् यत् राजधानीतः अनतिदूरे अरण्ये स्थिते गुरुकुले अधीयानानां तरुणच्छात्राणां विषये दृष्टिस्थापनम् अपि वरम् एव इति। अतः कदाचित् सायङ्कालसमये यात्रिकवेषं धृत्वा सः

गुरुकुलमार्गेण गच्छन् गुरुकुलात् अनतिदूरे स्थितायाः शिलायाः उपरि उपविष्टवान् क्रीडतां गुरुकुलच्छात्राणां व्यवहारं परिशीलयन्। तेषु कश्चन छात्रः एतस्य अवधानम् आकर्षत्। तस्य विषये अन्येषां सर्वेषां छात्राणां प्रीतिः आदरः च दृष्टः।

क्रीडासमये कुतश्चित् कश्चन शिलाखण्डः आगतः, तस्य बालकस्य ललाटे व्रणम् अकरोत् च । तस्य ललाटतः रक्तधारा निर्गता । केचन छात्राः समीपे एव प्राप्तानि पर्णानि निष्पीड्य रसं सम्पाद्य व्रणस्य चिकित्सां कृतवन्तः । अन्ये केचन छात्राः, यतः शिलाखण्डः आगतः तस्यां दिशि धावन्तः शिलाक्षेपकस्य ग्रहणाय प्रयासं कृतवन्तः। अल्पे एव काले तैः कश्चन गृहीतः। तम् आकृष्य ते स्वनायकस्य पुरतः उपस्थापितवन्तः।

''एषः सम्यक् दण्डनीयः'' इति अवदत् एकः। ''पाषाणक्षेपणेन एतस्य ललाटे अपि व्रणम् उत्पादयाम'' इति अवदत् अपरः। किन्तु तेषां नायकः कोपम् अकुर्वन् तम् अपृच्छत् शान्तस्वरेण – ''भवता किमर्थं शिलाखण्डः क्षिप्तः ?'' इति।

''महती बुभुक्षा आसीत् मम । उन्नतायां शाखायां मया कश्चन बीजपूरफलं दृष्टम् । तस्य प्राप्त्यर्थं मया शिलाखण्डः क्षिप्तः'' इति अवदत् सः पुरुषः। ''भवता बीजपूरं किं प्राप्तम् ?'' इति पृष्टं छात्रनायकेन।

''आम्। एतावता मया तत् खादितम् अपि'' इति उक्तवान् सः पुरुषः। ''भवतः बुभुक्षा न शान्ता स्यात् एतावता अपि। एवं ननु ?'' इति अपृच्छत् छात्रनायकः। ''तत् तु सत्यम्। किन्तु एतस्य खादनात् ग्रामपर्यन्तं गमनाय शक्तिः प्राप्ता मया। अतः अहं ग्रामं गत्वा मन्दिरे किमपि प्राप्नुयाम्। एतत् फलं यदि खादितं न स्यात् तर्हि मूर्च्छा प्राप्ता स्यात्'' इति अवदत् सः पुरुषः।

''भवान् अस्माभिः सह आगच्छतु। आश्रमे भवते पूर्णोदरं भोजनं दीयते अस्माभिः। रात्रिः आसन्ना अस्ति। अन्धकारे अरण्ये सञ्चारः अपायकरः। प्रभाते भवान् ग्रामं गन्तुम् अर्हति'' इति उक्त्वा तं पुरुषम् आश्रमं प्रति नेतुम् उद्युक्तः अभवत् सः छात्रनायकः।

''किम् एतत् मित्र ? यः भवन्तं पीडितवान् तस्यापि साहाय्यं किम् उचितम् ?'' इति पृष्टवन्तः केचन छात्राः।

''मित्राणि ! शिलाखण्डस्पर्शात् अचेतनः वृक्षः अपि तस्मै फलम् अयच्छत्। मानवः सन् अहं वृक्षेण यत् कृतं तदपि कर्तुं किं न शक्नुयाम् ? वृक्षेण फलं दत्तम्। मया च भोजनं दास्यते'' इति अवदत् छात्रनायकः।

एतस्य व्यवहारः नितरां श्लाघ्यः। कः स्यात् अयं तरुणः ?' इति स्वगतम् अवदत् मन्त्री प्रवृत्तं सर्वं दृष्ट्वा।

तान् छात्रान् अनुसरन् सः गुरुकुलं गतवान्, तत्रत्यं गुरुं स्वस्य परिचयम् उक्तवान् च। गुरोः मुखात् ज्ञातं यत् सः तरुणः व्रतशिलायाः युवराजः इति।

ततः मन्त्री राज्ञ्या सह गत्वा व्रतशिलायाः राज्ञीं दृष्ट्वा विवाहप्रस्तावम् उपस्थापितवान्। तया राज्ञ्या एषः प्रस्तावः अङ्गीकृतः। ततः व्रतशिलायाः युवराजस्य सुवर्णपुरस्य राजकुमार्याः च विवाहः सवैभवं सम्पन्नः। सः युवराजः एव उभयोः अपि देशयोः राजा जातः। योग्येन क्रमेण राज्यं पालयन् सः 'उत्तमः राजा' इति कीर्तिं सम्पादितवान्।

## बालचरितम् ( ग्रन्थपरिचयः )

✍ **व्योम शाहः**

अनुवर्तते

द्वितीयाङ्कस्य प्रारम्भे काश्चित् चाण्डालयुवतयः प्रविश्य कंसस्य पुरतः तेन सह विवाहं कर्तुम् इच्छां प्रकटयन्ति। अचिरात् ताः अदृश्याः भवन्ति। ततः वज्रबाहुनामधरः मधूकऋषेः शापः प्रविशति। सः कंसस्य हृदये प्रवेष्टुम् इच्छति। कंसः स्वपिति। राजश्रीः वज्रबाहुं हृदयप्रवेशाद् निषेधं करोति। विष्मोराज्ञा इति ताम् उक्त्वा सा निर्गता। ततः शापः हृदयं प्रविशति। एतत् सर्वं कंसः अनुभवति। निद्रायाः जागरितः सः प्रतिहारीं यशोधरां कञ्चुकीयं बालाकिम् आह्वातुम् आदिशति। शयनकाले कृतानाम् अनुभवानां फलं ज्ञातुम् इच्छन् कंसः तद्विषये प्रष्टुं बालाकिं राजपुरोहिताय प्रेषयति। राजपुरुषाः कस्यचित् जन्म सूचयन्ति। पृष्टे सति कञ्चुकीयः ज्ञापयति यत् देवकी पुत्रीं प्रसूतवती। ब्राह्मणस्य शापं स्मरन् सः बालिकाम् अपि तां हन्तुम् उद्यतः भवति। वसुदेवः आहूतः देवकीविषये च पृष्टः। क्रमेण सा दारिका आहूता खिन्नमनाः अपि कंसः तस्याः वधं कृत्वा शान्तिमन्वभवत्। ततः तत्र कात्यायनीप्रभृतयः प्रविश्य कंसवधार्थं स्वीयां प्रतिज्ञां प्रादुष्कृत्य विष्णोः बालचरितम् अनुभवितुं तत्रैव गोपालवेषेण अवतरिष्यामः इति निश्चित्य निर्गच्छन्ति।

तृतीयाङ्कस्य प्रवेशके दामक-वृद्धगोपालयोः संवादाद् इदं ज्ञायते यत् नन्दगोपस्य पुत्रावतरणानन्तरं गोधनं हृष्टमेव भवति। कालः व्यतीतः। पूतना-शकट-प्रभृतीनां बालेन कृतः नाशः, उलूखल-प्रसङ्गः, दानवानां संहारः, बालस्य नवनीतभोजनार्थं लीलाः प्रकटीकृताः। दामोदरः इति तस्य विख्यातम्। एवं प्रवेशकस्य समाप्तिः भवति। दामोदरः, सङ्कर्षणः, गोप्यः, दामकः इत्यादयः हल्लीसकक्रीडां कर्तुम् उद्यताः। यदा सर्वेऽपि केलिं कुर्वन्ति स्म तदैव दामकः आगत्य अरिष्टवृषभनाम्नो दैत्यस्य आगमनविषये सूचयति। गोपबालान् दारिकाश्च पर्वतशिखरं प्रति नेतुं दामोदरः दामकं दिशति। उग्ररूपम् अरिष्टर्षभमपि दृष्ट्वा सः दामोदरस्य प्रशंसां करोति। दामोदरोऽपि भयहेतुम् अपश्यन् प्रतिवदति – ''किमेतत् भोः! **भयं नाम भवतोऽद्य मया श्रुतम्। भीतानामभयं दातुं समुत्पन्नो महीतले॥**''

तयोः वाग्युद्धं भवति। प्रहारमात्रेण दामोदरः तम् उपक्षिपति। दानवः निधनम् आप्तवान्। ततः दामकः पुनरप्यागत्य कथयति यत् ''यमुनाह्रदे कालियः इति नामधेयो नाग उत्थितः'' इति श्रुत्वा सङ्कर्षणः तत्र गतः। सः तं वारयितुं दामोदराय निवेदयति। अङ्कस्य समाप्तिः कालियदर्पप्रशमनपूर्विका भवति।

चतुर्थाङ्कस्य आरम्भः यमुनातटे भवति। गोपाङ्गनाः दामोदरं जलप्रवेशाद् वारयन्ति। ताः आधारस्य कालियं धर्षितुं सः जले प्रविशति। ततः वृद्धगोपालकः तत्र प्रविश्य स्थितिं दृष्ट्वा खिन्नः। व्याघ्रादयोऽपि यत्र पानीयं पीत्वा म्रियन्ते तत्र नन्दगोपस्य किं भविष्यति इति विचिन्त्य सः दुःखितः। ततः कालियेन सह दामोदरः प्रविशति। स्वीयं पराक्रमं वर्णयन्तं नागं दामोदरः भुजं दग्धुम् आह्वयति। एतेन प्रसङ्गेन नागः ज्ञातवान् यदयं स्वयं भगवान् नारायणः। सः तस्य शरणम् आगतः।

यमुनाप्रवेशनस्य कारणे पृष्टे तेन सूचितं यत् तेषां वाहनात्-गरुडात् भयम् अनुभवन् सः तत्र प्रविष्टः। कालियस्य भोगे स्थितत्वात् दामोदरस्य तत्र चिह्नं सञ्जातम्। तत् चिह्नं दृष्ट्वा गरुडः तस्मै अभयं दास्यति इति समाश्वसितवान् कालियः सबान्धवः प्रतिन्यवर्तत। सङ्कर्षणेन गोपीभिश्च सः स्वीयां क्रीडां पुनः प्रारभत। अथ कश्चित् भटः तत्र आगत्य निवेदयति यत् मथुरायां कंसेन ''धनुर्मदः'' इति नामेधेयः उत्सवः समायोजितः। तत्र सङ्कर्षणेन सह मल्लव्यं


( क्रमशः.... )

## मासवार्त्ता:

### सम्पन्नः 'संस्कृत-लिटरेचर-फेस्टिवल' कार्यक्रमः






एकलव्य-संस्कृत-एकेडेमी, संस्कृतविद्याप्रतिष्ठानं, श्रीदिव्य-जीवन-सांस्कृतिकसङ्घः (शिवानन्द-आश्रमः), संस्कृत-साहित्य-अकादमी इत्येतेषां संयुक्तोपक्रमेण डिसेम्बरमासस्य २१, २२ दिनाङ्कयोः अमदावादनगरे शिवानन्द-आश्रमे सम्पन्नः भव्यः 'संस्कृत-लिटरेचर-फेस्टिवल' कार्यक्रमः । एतस्य कार्यक्रमस्य तृतीयायाम् आवृत्त्याम् संस्कृतसाहित्यम् अधिकृत्य विविधानि व्याख्यानानि आयोजितानि आसन् । आयोजनेऽस्मिन् 'स्वामी विवेकानन्द की दृष्टि से संस्कृतभाषा' इति विषये स्वामी निखिलेश्वरानन्दजी महाराजः (अध्यक्षः, श्रीरामकृष्ण-आश्रमः), 'आधुनिक समय-साहित्य का युगधर्म' इति विषये डॉ. भाग्येशः ज्हा (अध्यक्षः, गुजरात-साहित्य-अकादमी), 'संस्कृत की प्रासंगिकता' इति विषये श्रीरवीन्द्रः खताळे (IAS), 'शास्त्रार्थनिदर्शनम्' इति विषये डॉ. अमृतलालः भोगायता, (प्रधानाचार्यः, ब्रह्मर्षि-संस्कृत-महाविद्यालयः,), 'शास्त्रपरिचयः' इति विषये डॉ. अर्जुनकुमारः सामलः (प्रधानाचार्यः,'दर्शनम्' संस्कृत-महाविद्यालयः), 'श्रीमद्भगवद्गीता-मूल्य एवं सिद्धांत' इति विषये डॉ. अमी जोशी (अध्यापिका, GCERT, गान्धिनगरम्), 'गीता – मानव मन का समाधान' इति विषये डॉ. रवीन्द्रकुमारः खाण्डवाला (अध्यापकः, श्री एच. के. विनयन-महाविद्यालयः), 'आयुर्वेदः पञ्चमो वेदः' इति विषये डॉ. हिमांशुः जोषी (शतायु आयुर्वेद केन्द्र), 'ज्योतिषामयनं चक्षुः' इति विषये डॉ. अवनी जोषी (वैद्या, शतायु वैदिक गर्भसंस्कार तथा संशोधन केन्द्र), ' Talk on Sanskrit Short Film' इति विषये श्रीमान् महारुद्रः शर्मा, 'सिनेमा और संस्कृत' इति विषये डॉ. नारायणदत्तः मिश्रः (संस्कृतपत्रकारः DD News), 'भरतमुनि का नाट्यशास्त्र-वर्तमान परिप्रेक्ष्य में' इति विषये डॉ. महेशः चंपकलालः, 'भरत का रङ्गमण्डप' इति विषये श्रीभार्गवः ठक्करः, दूतवाक्यस्य विषये डॉ. महेशकुमारः पटेलः च मनोहराणि व्याख्यानानि अकुर्वन्। अत्र उल्लेखनीयं यत् रात्रीकार्यक्रमे २१ दिनाङ्के संस्कृतसङ्गीतोत्सवस्य प्रयोगः, २२ दिनाङ्के भासविरचितस्य दूतवाक्यस्य प्रयोगः च अभवत्। कार्यक्रमेऽस्मिन् भागं स्वीकृत्य संस्कृतरसिकाः प्रसन्नाः आसन्।

## कृपया हसन्तु

शिक्षकः - (नमनम् उद्दिश्य) यदि एकं कृषिक्षेत्रं क्रष्टुं द्वौ कृषकौ दिनद्वयं कार्यं कुरुतः तर्हि तदेव क्षेत्रं क्रष्टुं चत्वारः कृषकाः कति दिनानि कार्यं करिष्यन्ति ?

नमनः - महोदय ! पूर्वं भवान् वदतु यत् एकवारं कृष्टं क्षेत्रं कैः मूर्खैः पुनः कर्ष्यते ?

★ ★ ★ ★ ★

शिक्षकः - (रमणम् उद्दिश्य) भोः रमण ! यदि दशजनानां कृते पञ्चलिटरपरिमितं दुग्धम् आवश्यकं तर्हि पञ्चदशजनानां कृते कियत् दुग्धम् आवश्यकम् ?

रमणः - भोः महोदय ? दुग्धं तु पञ्चलिटरपरिमितम् एव आवश्यकम् । केवलं जलस्य मात्रा वर्धनीया भविष्यति ।

★ ★ ★ ★ ★

नमनस्य हस्ते नूतनां दूरवाणीं दृष्ट्वा -

रमणः - नूतना दूरवाणी क्रीता वा ?

नमनः - न, न । एषा दूरवाणी मम पत्न्याः अस्ति ।

रमणः - पत्न्याः दूरवाणी किमर्थं स्वीकृता ?

नमनः - सा प्रतिदिनं वदन्ती आसीत् भवान् मम दूरवाणीं न स्वीकरोति, भवान् मम दूरवाणीं न स्वीकरोति । अद्य मया अवसरः लब्धः अतः मया तस्याः दूरवाणी स्वीकृता ।

## सुभाषितम्

– संस्कृतविकिपीडियाजालस्थानात्

**यावद् भ्रियेत जठरं तावत् स्वत्वं हि देहिनाम् ।**
**अधिकं योऽभिमन्येत स स्तेनो दण्डमर्हति ॥**

**तात्पर्यम्** – उदरपोषणाय यावदपेक्षितं तावती सम्पतिः एव मानवानां स्वत्वम् । तदपेक्षया यः अधिकां सम्पत्तिम् इच्छेत सः चोरः । अतः दण्डार्हः ।

**युक्तियुक्तं प्रगृह्णीयाद् बालादपि विचक्षणः ।**
**रवेरविषयं वस्तु किं न दीपः प्रकाशयेत् ॥**

**तात्पर्यम्** – बुद्धिमान् जनः बालकात् अपि हितकरं वचनं स्वीकुर्यात्, यतः सूर्यः यं पदार्थं न प्रकाशयति तं पदार्थं किं दीपकः प्रकाशयितुं न शक्नोति ? अर्थात् सूर्यः यं पदार्थं न प्रकाशयति दीपकः तं पदार्थं प्रकाशयितुं शक्नोति ।

**युद्धं च प्रातरुत्थानं भोजनं सह बन्धुभिः ।**
**स्त्रियमापद्गतां रक्षेत् चतुश्शिक्षेत कुक्कुटात् ॥**


**तात्पर्यम्** – युद्धकरणं, प्रातः शीघ्रमुत्थानं, बान्धवैः सह भोजनम्, आपत्तौ विद्यमानस्य स्त्रीकुलस्य रक्षणम् इत्येतान् चतुरः गुणाः कुक्कुटस्य सकाशात् ज्ञातव्याः ।

## ज्ञानसरित्

श्यामः पटेलः

**विशिष्टः ऊर्णनाभः –**

**"रामेश्वरं पेरेशूट"**



भारते विश्वेऽपि ऊर्णनाभस्य नैकाः प्रजातयः सन्ति । इतोऽपि नूतनानां प्रजातीनाम् अन्वेषणं जायमानमस्ति । ख्रीस्ताब्दस्य चतुराधिकद्विसहस्रतमे वर्षे दक्षिणभारतस्य रामेश्वरतीर्थे ऊर्णनाभस्य एकां विशिष्टां प्रजातिं जीवशास्त्रिणः प्राप्तवन्तः। तस्याः नामाभिधानं "रामेश्वरं पेरेशूट स्पाइडर" इति अभवत्।

अस्य ऊर्णनाभस्य शरीरस्य वर्णः मयूरपिच्छानां वर्णः इव हरितः भवति। तस्य आहत्य अष्ट पादाः भवन्ति। एते पीतवर्णीयाः पादाः ८ इञ्चमिताः दीर्घाः भवन्ति। ऊर्णनाभस्य शरीरं ४ सेन्टिमीटरमितं भवति। एषः लघुजन्तूनां बिलं प्रविश्य विषस्य स्रावं कृत्वा मृगयां करोति। एषः ऊर्णनाभः समुद्रतटे जायमानेषु ताडवृक्षेषु नारिकेलवृक्षेषु वा वसति। सुदीर्घपादः अयम् ऊर्णनाभः उन्नतेभ्यः वृक्षेभ्यः पेरेशूट–यन्त्रमिव अधः अवतीर्य भूतलस्थं जन्तुं खेटित्वा खादति। रामेश्वरे दृश्यमानः एषः श्रीलङ्कायामपि दृश्यते। सम्प्रति एषा प्रजातिः मृतप्राया अस्ति।

ऊर्णनाभः – spider

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **अवरोधः** | निषेध | prohibition |
| **अविभ्रमः** | प्रज्ञा | prudence |
| **सार्वजनीन** | सार्वजनिक | public |
| **प्रतिभावान्** | तीक्ष्णबुद्धि | quick-witted |
| **समुद्यमः** | सज्जता | readiness |
| **संवर्धितः** | परिपालित | reared |
| **लवनम्** | लावनी | reaping |
| **आर्भतृप्तः** | तबीयत खुश होना | refreshed |
| **उदर्कः** | परिणाम | end/ result |
| **आपादः** | पारितोषिक | remuneration |
| **समुद्बोधनम्** | पुनर्जीवन | resusatation |
| **अपथः** | मार्गहीन | roadless |
| **पांसुः** | मिट्टी | sand |
| **अभूयिष्ठम्** | थोडा | scanty |
| **आकीर्णम्** | बिखरा हुआ | scattered |

## किं भवन्तः जानन्ति ?

**१ ) प्राचीननगर्याः मधुपुर्याः अद्यतनं नाम किं वर्तते ?**

(क) गया (ख) वाराणसी (ग) मथुरा (घ) इलाहबाद

**२ ) इन्द्रप्रस्थे प्रसिद्धस्य उद्यानस्य नाम, किम् अस्ति ?**

(क) प्रमदावनम् (ख) वृन्दावनम् (ग) नन्दनम् (घ) मधुवनम्

**३ ) महाभारतस्य युद्धं कुत्र अभवत् ?**

(क) मगधे (ख) मथुरायाम् (ग) कुरुक्षेत्रे (घ) हस्तिनापुरे

**४ ) जनमेजयेन नागयज्ञस्य आयोजनं कुत्र कृतम् आसीत् ?**

(क) तक्षशिलायाम् (ख) हस्तिनापुरे (ग) अहिच्छत्रे (घ) पुरुषपुरे

**५ ) एतेषु किं स्थानं 'समन्तपञ्चकं' कथ्यते ?**

(क) हरिद्वारम् (ख) प्रयागः (ग) वाराणावतम् (घ) कुरुक्षेत्रम्

**६ ) ऋषेः परशुरामस्य आश्रमः कस्मिन् पर्वते आसीत् ?**

(क) विंध्याचले (ख) रैवतके (ग) महेन्द्रे (घ) कैलासे


**७ ) खाण्डववनं ज्वालयित्वा पाण्डवाः किं नगरम् अरचयन् ?**

(क) खाण्डवप्रस्थ (ख) इन्द्रप्रस्थ (ग) द्वारिका (घ) अहिच्छत्र

उत्तराणि – (१) ग (२) ग (३) ग (४) क (५) घ (६) ग (७) ख

## ‘संस्कृत-लिटरेचर-फेस्टिवल’ कार्यक्रमः





















**प्रियवाचकाः**

- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।

EKLAVYA
SANSKRIT
ACADEMY
|| जयतु संस्कृतं जयतु भारतम् ||

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006